श्री हरि शरणाष्टकं

श्री हरि शरणाष्टकं

ध्येयं वदंति शिवमेव हि केचिदन्ये
शक्तिं गणेशमपरे तु दिवाकरं वै |
रूपैस्तु तैरपि विभासि यतस्त्वमेव
तस्मात्त्वमेव शरणं मम शंखपाणे || 1 ||

नो सोदरो न जनको जननी न जाया
नैवात्मजो न च कुलं विपुलं बलं वा |
संदृश्यते न किल कोऽपि सहायको मे
तस्मात्त्वमेव शरणं मम शंखपाणे || 2 ||

नोपासिता मदमपास्य मया महांत-
-स्तीर्थानि चास्तिकधिया नहि सेवितानि |
देवार्चनं च विधिवन्न कृतं कदापि
तस्मात्त्वमेव शरणं मम शंखपाणे || 3 ||

दुर्वासना मम सदा परिकर्षयंति
चित्तं शरीरमपि रोगगणा दहंति |
संजीवनं च परहस्तगतं सदैव
तस्मात्त्वमेव शरणं मम शंखपाणे || 4 ||

पूर्वं कृतानि दुरितानि मया तु यानि
स्मृत्वाऽखिलानि हृदयं परिकंपते मे |
ख्याता च ते पतितपावनता तु यस्मा-
-त्तस्मात्त्वमेव शरणं मम शंखपाणे || 5 ||

दुःखं जराजननजं विविधाश्च रोगाः
काकश्वसूकरजनिर्निचये च पातः |
तद्विस्मृतेः फलमिदं विततं हि लोके
तस्मात्त्वमेव शरणं मम शंखपाणे || 6 ||

नीचोऽपि पापवलितोऽपि विनिंदितोऽपि
ब्रूयात्तवाहमिति यस्तु किलैकवारं |
तस्मै ददासि निजलोकमिति व्रतं ते
तस्मात्त्वमेव शरणं मम शंखपाणे || 7 ||

वेदेषु धर्मवचनेषु तथागमेषु
रामायणेऽपि च पुराणकदंबके वा |
सर्वत्र सर्वविधिना गदितस्त्वमेव
तस्मात्त्वमेव शरणं मम शंखपाणे || 8 ||

इति श्रीमत्परमहंस स्वामि ब्रह्मानंद विरचितं श्री हरि शरणाष्टकं |